**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 9.134
Volume - 9, Issue - 4, April - 2026

DOIs:10.2018/SS/202604003 --:-- Research Paper / Article / Review

# महाभारतीय साहित्ये सुभाषितानां नारीनां स्थानम्

(Mahabharatiya Sahitye Subhashitanam Narinam Sthanam)

**डॉ सङ्गीता मण्डल**
वीरभूम्, पश्चिमवङ्गम्
sangitam231@yahoo.com

**सारसंक्षेपः** महाभारते सुभाषितं भारतीयमहाकाव्यपरम्परायां नारीस्वरूपस्य सूक्ष्मं विश्लेषणं प्रस्तुतयति। महाभारते सुभाषितरूपेण व्यक्तानि नीतिवचनानि, उपदेशात्मकाः संवादाः तथा जीवनमूल्यपरकाः विचाराः न केवलं समाजस्य नैतिकदिशां दर्शयन्ति, अपितु तेषु नारीणां स्थानं, महत्त्वं तथा प्रभावः अपि सुस्पष्टतया प्रकाशते। महाभारते नारी विविधरूपेण चित्रिता अस्ति—माता, पत्नी, विदुषी, परामर्शदात्री, धैर्यशीलिनी च। द्रौपदी, कुन्ती, गान्धारी इत्यादीनां चरित्रेषु नारीशक्तेः, धैर्यस्य तथा नीतिज्ञानस्य उत्कृष्टं दर्शनं भवति। सुभाषितेषु नारीणां प्रति सम्मानः, तासां संरक्षणस्य आवश्यकता तथा पारिवारिक-सामाजिक जीवनस्य आधाररूपेण तासां भूमिका प्रतिपादिता अस्ति। एतत् अध्ययनं दर्शयति यत् महाभारतीय सुभाषितसाहित्यं नारीणां केवलं पारम्परिकं रूपं न प्रस्तौति, अपितु तासां बौद्धिक, नैतिक तथा आध्यात्मिक योगदानं अपि जागरयति। अतः नारी महाभारतीय दृष्ट्या समाजस्य आधारस्तम्भः इति निष्कर्षः सुस्पष्टः भवति।

**मुख्यशव्दः** सुभाषितम्, नीतिवचनानि, परामर्शदात्री, धैर्यशीलिनी, नारीशक्तिः ।

वेदेषु रामायणेषु च सुभाषितानां पल्लवनं श्रोतृणामानन्दाय भवति। महाभारतीयसाहित्ये सुभाषितेषु नारीणां स्थानं बहुआयामी अस्ति। ताः केवलं गृहिण्यः वा आश्रिताः न सन्ति, अपितु नीति, धर्म तथा निर्णयप्रक्रियायां सक्रियं योगदानं वहन्ति। सुभाषितेषु नारीणां महत्त्वं माता, पत्नी, सहधर्मचारिणी, उपदेशदात्री तथा धैर्यस्य प्रतीकरूपेण प्रतिपादितम् अस्ति। द्रौपदी, कुन्ती, तथा गान्धारी इत्यादीनां चरित्रेषु एते गुणाः स्पष्टतया अवलोक्यन्ते।

***माता -***

माता मनुष्यस्य अरणिसदृशी यतः सा शरीररूपम् अग्निं प्रकटीकरोति । संसारे सर्वार्त्तानां प्राणिनां सुखसान्त्वनाप्रदायिनी माता । मातरि स्थितायां मनुष्य सनाथो भवति । मातृवियोगाद् अनाथो भवति । अतः उच्यते माता यस्य गृहे नास्ति अरण्यं तेन गन्तव्यम् – **माता देहारणिः पुंसां सर्वस्यार्तस्य निर्वृतिः । मातृलाभे सनाथत्वमनाथत्वं विपर्यये** ।। ( वनपर्वणि, अध्यायः 200, श्लोकः 110).

अस्मिन् संसारे मातृसमा कोऽपि नास्ति । अतः पुत्रः समर्थः असमर्थोऽपि वा माता यत्नेन तं प्रतिपालयति बहुकृच्छ्रसाधनेन । मातृहीनमिदं जगत् शून्यं मन्यते –

समर्थं वासमर्थं वा कृशं वाप्यकृशं तथा । रक्षत्येव सुतं माता नान्यः पोष्टा विधानतः ।।
तदा स वृद्धो भवति तदा भवति दुःखितः । तदा शून्यं जगत् तस्य यदा मात्रा वियुज्यते।। (शान्ति, 266.29,30).

मातृसमा छाया नास्ति । मातृछायायां यत् सुखं लभ्यते तद् अन्यत्र कुत्रापि नोपलभ्यते । मातृसमा कोऽपि न रक्षिका अस्ति यतः अपत्यरक्षणार्थं मातुः कृच्छ्रसाधनम् अनन्तमिति अस्मिन् प्रसंगे महाभारते उच्यते –

नास्ति मातृसमा छाया नास्ति मातृसमा गतिः ।
नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रिया ।। (शान्ति, 266.31)

माता गर्भधारणाद् धात्री, जन्मप्रदानाद् जननी, सन्तानप्रसवात् प्रसविनी, शिशोः अंगवर्धनाद् अम्बा, वीरसन्तानप्रसवाद् वीरसू, शिशोः शुश्रुषाकारणात् शुश्रु इतिविभिन्न- नाम्ना विभूषिता । अस्माद् एतत् प्रतीयते यद् नास्ति मातृसमो गुरु । सन्तानसमीपे अस्मिन् संसारे मातृतुल्यः कोऽपि प्रियस्वजनो नास्ति । अतः अपत्येन माता सर्वथा पूजनीया अर्चनीया वन्दनीया चेति – **कुक्षिसंधारणाद् धात्री जननाज्जननी स्मृता । अंगानां वर्धनादम्बा वीरसूत्वेन वीरसूः** (शान्ति, 266.32) ।।

अस्यां जगति पित्रा समं मात्रा समं कोऽपि नास्ति । मातुः माहात्म्यं दशपितृभ्यो अधिकम् । माता स्वगौरवेण पृथिवीं जयति । माता अतीव क्लेशेन सन्तानं पालयति । अतः अस्यां जगति मातृसमो गुरुर्नास्ति । उक्तं च –

पितृन् दश तु मातैका सर्वा वा पृथिवीमपि ।
गुरुत्वेनाभिभवति नास्ति मातृसमो गुरुः ।। (शान्ति, 108.17)

दशाचार्याद् उपाध्यायः, दशोपध्यायात् पिता, दशपितुरपि अधिक माता । माता गौरवेण पृथ्वीं तिरस्करोति । अत माता हि श्रेष्ठा –

दश चैव पितृन् माता सर्वां वा पृथिवीमपि ।
गौरवेणाभिभवति नास्ति मातृसमो गुरुः ।। (अनुशासन,105.15)

***भार्या -***

यदि स्त्री सदा स्वामिनः प्रिया हितकरी च तर्हि यज्ञ-तपस्या-नियम-दानेभ्यः अधिकतमा भवति – **यज्ञैस्तपोभिर्नियमैर्दानैश्च विविधैस्तथा । विशिष्यते स्त्रिया भर्तुर्नित्यं प्रियहिते स्थितिः** (आदि, 157.24) ।। नारी सन्तानजन्मनः परं पतिसेवां प्रति न अनुध्याति । अतः पुरुषस्य भार्या न सदा विश्वसनीया । अस्मिन् प्रसंगे महाभारते उच्यते –

न हि भार्येति विश्वासः कार्यः पुंसा कथंचन ।
न हि कार्यमनुध्याति नारी पुत्रवती सती ।। (आदि, 232.31)

व्यभिचारिणी स्त्री तिरस्करणीया यतः तिरस्कारात् स्त्री शुद्धा भवति । अतः महाभारते उच्यते – **स्त्रियास्तथापचारिण्या निष्कृतिः स्याददूषिका । अपि सा पूयते तेन न तु भर्ता प्रदुष्यति** (शान्ति, 34.30) ।। यथा राजान्नं तेजो हरति तथैव पुत्रहीनायाः भार्यायाः अन्नं आयुर्नाशयतीति व्यासदेवस्य मतम् –

राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुः सुवर्णकारान्नमवीरायाश्च योषितः ।। (शान्ति, 36.27)

भार्यासमः कोऽपि नास्ति इत्यत्र नास्ति संशयः, भार्यासमो बन्धुर्नास्ति । भार्यासमो गतिः नास्ति । धर्मसंग्रहे भार्यासमः कोऽपि सहायको नास्ति इति व्यासेनोद्घोष्यते –

नास्ति भार्यासमो बन्धुर्नास्ति भार्यासमा गतिः ।
नास्ति भार्यासमो लोके सहायो धर्मसंग्रहे ।। (शान्ति, 144.13)

स्त्री समाजे प्रकृतितुल्या । अतः सा क्षेत्रस्वरूपा, पुरुषः क्षेत्रज्ञरूपश्च । यथा प्रकृतिः निर्बोधपुरुषं मायापाशेनावद्धं करोति तथैव संसारे स्त्री मोहेन पुरुषं वशीभूतं करोति । अतः स्त्रीसंसर्गात् पुरुषो दूरं तिष्ठेत् –

प्रकृत्या क्षेत्रभूतास्ता नराः क्षेत्रज्ञलक्षणाः ।
तस्मादेवाविशेषेणा नरोऽतीयाद् विशेषतः ।। (शान्ति, 213.8)

श्रेष्ठा नार्यः पतिपरित्यक्ता सत्यपि नाभिक्रूध्यन्ति । ताः चारित्रकवचावृतान् प्राणान् धारयन्ति – **रहिता भर्तृभिश्चैव न कुप्यन्ति कदाचन । प्राणांश्चारित्रकवचान् धारयन्ति वरस्त्रियः** (वन, 70.9) ।। पुत्रेण पित्रोः सेवा, स्त्रीया च पतिसेवाजनितधर्मः श्रेष्ठ धर्मः । एतद् विना जगति दुष्करकार्यं किमपि नास्ति । सदाचारिण्यः स्त्रियः महत् कार्यं कुर्वन्ति । पतिव्रता सत्यवादिन्यः स्त्रियः सुकठिनं धर्मं पालयन्ति । स्त्रियः कुक्षिणा दशमासान् गर्भं संधारयन्ति ततः यथाकालं सन्तानं प्रसूवन्ति महत् क्लेशं सोढ्वा च । इदमद्भुतकर्म नारी व्यतिरेकेण जगति सुदुष्करम् –

मातापित्रोश्च शुश्रूषा स्त्रीणां भर्तरि च द्विज ।
स्त्रीणां धर्मात् सुघोराद्धि नान्यं पश्यामि दुष्करम् ।
साध्वाचाराः स्त्रियो ब्रह्मन् यत् कुर्वन्ति सदाऽऽवृताः ।
दुष्करं खलु कुर्वन्ति पितरं मातरं च वै ।
एकपत्न्यश्च या नार्यो याश्च सत्यं वदन्त्युत ।
कुक्षिणा दश मासांश्च गर्भं संधारयन्ति याः ।। (वन, 205.8-10)

त्रिषु लोकेषु पतिसमो गुरुर्नास्ति नारीणाम् । पतिप्रभावेन नारीणां सर्वकामना सफलीभवति । अतः पतिसेवा नारीणां श्रेष्ठधर्मः । पतिसेवा हि भगवत्सेवा । पत्या स्त्रियः सर्वम् ऐश्वर्यं लभन्ते । तया स्त्रीभिः स्वर्गलोकं तथा महत् यशश्च समुपलभन्ते । अतः हि नारीणां भूषणं पतिः । नारीणां पतिः सर्वथा पूजनीयो वन्दनीयश्च –

नैतादृशं दैवतमस्ति सत्ये सर्वेषु लोकेषु सदेवकेषु ।
यथा पतिस्तस्य तु सर्वकामा लभ्याः प्रसादात् कुपितश्च हन्यात् ।।
तस्मादपत्यं विविधाश्च भोगाः शय्यासनान्युत्तमदर्शनानि ।
वस्त्राणि माल्यानि तथैव गन्धाः स्वर्गश्च लोको विपुला च कीर्तिः ।। (वन, 234.2,3)

वृक्षस्य मूलं सस्त्रीकपुरुषस्य हि गृहसदृशम् । अथच स्त्रीहीनः प्रासादोऽपि गहनवनसदृशः – **वृक्षमूलेऽपि दयिता यस्य तिष्ठति तद् गृहम् । प्रासादोऽपि तया हीनः कान्तार इति निश्चितम्** (शान्ति, 144.12) ।। अस्यां जगति पुरुषस्य प्रधाना सम्पत्तिः पत्नी । असहायजनस्य सहायिनी तस्य पत्नी । पीडितजनस्य भार्यासमं भेषजं नास्ति –

भार्या हि परमो ह्यर्थः पुरुषस्येह पठ्यते ।
असहायस्य लोकेऽस्मिंल्लोकयात्रासहायिनी ।।
नास्ति भार्यासमं किंचिन्नरस्यार्तस्य भेषजम् ।। (शान्ति, 144.14,15)

महाभारते भार्याप्रसंगे सुभाषितश्लोकस्य विशेषसौन्दर्यं परिलक्ष्यते । समाजे भार्याणां गुरुत्वम् अधिकम् । इह खलु संसारे भार्या श्रेष्ठासने सुप्रतिष्ठिता । भार्यासमः कोऽपि नास्ति इत्यत्र नास्ति संशयः। भार्यासमो बन्धुर्नास्ति, भार्यासमो गतिः नास्ति । धर्मसंग्रहे भार्यासमः कोऽपि सहायको नास्तीति व्यासेनोद्घोष्यते – **नास्ति भार्यासमो बन्धुर्नास्ति भार्यासमा गतिः । नास्ति भार्यासमो लोके सहायो धर्मसंग्रहे** (शान्ति, 144.16) ।। यस्य भार्या अप्रियभाषिणी असती च तेन अरण्यं गन्तव्यम् । यतः तत् समीपे यथारण्यं तथा गृहम् –

यस्य भार्या गृहे नास्ति साध्वी च प्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ।। (शान्ति, 144.17)

दुष्कुलादपि जाता उत्तमपत्नीं ग्रहीतव्या । विषमयस्थानात् चेद् अमृतं लभ्यते तर्हि अवश्यमेव पेयम् , यतः स्त्रीरत्नमाप धर्मतः कदापि न दूषणीय इति – **स्त्रीरत्नं दुष्कुलाच्चापि विषादप्यमृतं पिबेत्** (शान्ति, 165.32) ।

सर्वत्र सुभाषितानि समाजस्योपकारकाणि भवन्ति । महाभारतस्य सुभाषितानि परवर्त्तिकाले बहुभिः पण्डितैः समाजसंस्काराय विविधेषु ग्रन्थेषु प्रत्यर्पितानि । एषु पञ्चतन्त्रस्य कथाकारः विष्णुशर्मा अन्यतमः । आधुनिक समाजेऽपि मनुष्याणां सद्बुद्धि- वर्धनाय एतानि सुभाषितानि समर्थानि भवन्ति । सुभाषितानि जीवनार्थमयानि जीवनदृष्टिदायकानि च भवन्ति । अतः निष्कर्षतः उक्तुं शक्यते यत् महाभारतीयसुभाषितसाहित्यं नारीणां केवलं सामाजिककर्तव्यं न निरूपयति, अपितु तासां गरिमा, बौद्धिकता तथा जीवननिर्देशकभूमिकां अपि प्रतिष्ठापयति। एतेन स्पष्टं भवति यत् नारी महाभारतीयदृष्ट्या समाजस्य नैतिक-आध्यात्मिक-आधारस्तम्भः अस्ति।

## सन्दर्भसूची:

1.श्रीमन्महर्षि वेदव्यासप्रणीत महाभारतम्, प्रकाशकः – गोविन्दभवन कार्यालय, गीताप्रेस, गोरखपुरम्, षोडशसंस्करणम्, 2075 संवत्सरम्.